सम्भाषण
सन्देशः

❄ इण्टर्नेट्-प्रपञ्चे संस्कृततरङ्गाः



पत्राचारविद्युन्मानव्यवस्था (E-mail) पत्राचारसङ्केतावलिः (mailing list) वार्तासमूहाः (News groups) डैजेस्ट् । सञ्चिकाविनिमयव्यवस्था (File Transfer) इत्यादिभिः युतस्य इण्टर्नेट्प्रपञ्चस्य परिचयः, संस्कृतप्रियेभ्यः इण्टर्नेट्-सौलभ्यानि - इत्यादीनां समग्रं विवरणम् ।

इण्टर्नेट् इत्युक्ते किम् ?

सङ्गणकयन्त्रविषये इदानीं सर्वे किञ्चित् जानन्ति एव । विविधसूचनानां (Information) व्यवस्थितक्रमेण उपयोगाय सङ्गणकस्य उपयोगः क्रियते । इदानीं तु प्रतिगृहं वैयक्तिकसङ्गणकयन्त्राणि (Personal Computers - PC) दृश्यन्ते । सङ्गणकयन्त्राणाम् उपयोगः यदा अधिकः जातः तदा तेषां यन्त्राणां मध्ये परस्परं सम्पर्कं कल्पयित्वा, समूहरूपेण यथा कार्यं कर्तुं शक्यते तादृशं तन्त्रज्ञानम् आविष्कृतम् । एतदेव LAN (Local Area Network) इत्युच्यते । कस्मिंश्चित् कार्यालये स्थितानां १०-१५ सङ्गणकयन्त्राणां मध्ये सम्पर्कजालं कल्प्यते । एतेन जालेन केनापि यन्त्रेण अन्यस्य यन्त्रस्य सम्पर्कः कर्तुं शक्यते । विषयाणां (Information) विनिमयः, कार्याणां वितरणं च अत्र कर्तुं शक्यते ।

वित्तकोषादिषु महाकार्यालयेषु अधिक-सामर्थ्ययुतानि द्वित्राणि यन्त्राणि भवन्ति । शताधिकानि साधारणयन्त्राणि LAN व्यवस्थया परस्परं सम्बद्धानि भवन्ति । १९७०तमदशकस्य आरम्भे एषा व्यवस्था दूरभाषाव्यवस्थाद्वारा ग्रामात् ग्रामं, राज्यात् राज्यं प्राविशत् ।

एतस्मिन् एव सन्दर्भे केचन वैज्ञानिकाः एतादृशानि पृथक् पृथक् स्थितानि आन्तरिकजालानि यथा परस्परं सम्बद्धानि भवेयुः तथा कर्तुम् अपेक्षितां व्यवस्थां सज्जीकर्तुं प्रयत्नं कृतवन्तः । एतेन TCP / IP (Transmission Control Protocal / Internet Protocal) इत्यस्याः व्यवस्थायाः आविष्कारः अभवत् । अधिकैः नेट्वर्कजालैः यदा एतस्य तन्त्रज्ञानस्य उपयोगः आरब्धः तदा इण्टर्नेट्-इत्यस्य आरम्भः जातः । सरलया भाषया वक्तव्यं चेत् नेट्वर्क्जालानां किञ्चित् महाजालम् एव इण्टर्नेट् इत्युच्यते । उपग्रहदूरसम्पर्कव्यवस्था अत्र 'वरत्वेन' परिणता । १९८३-१९९० एतेषु सप्तसु वर्षेषु ४००० अधिकानि नेट्वर्कजालानि (माकिं २,००,००० सङ्गणकयन्त्राणि) परस्परं सम्बद्धानि । एतदेव अद्य सर्वत्र श्रूयमाणा इण्टर्नेट्व्यवस्था ।

शैक्षणिक - वैज्ञानिकेत्यादिषु अनेकेषु क्षेत्रेषु विषयाणां (Information) महापूरः एव आगतः । आन्तरिकजालेन सम्बद्धं प्रत्येकं सङ्गणकयन्त्रं जगतः कस्मिन्नपि कोणे विद्यमानेन अपि अन्येन यन्त्रेण सम्बद्धं भवति । विशेषज्ञानाम् समीक्षा वदति यत् प्रकृतं एतादृशानि माकिं ४००० इण्टर्नेट्- जालानि ५०,००० अधिकानि सङ्गणकजालानि संयोज्य तद्द्वारा कोट्यधिकजनानां सम्पर्कसाधने सफलानि जातानि सन्ति इति ।

❄ संस्कृतद्वारा समरसतायाः आग्रही आसीत् पूज्यबाळासाहेबः

- चमूकृष्णशास्त्री

❄ अस्तङ्गतः मधुकरः **- चिन्तकः**

राष्ट्रियस्वयंसेवकसङ्घस्य भूतपूर्वसरसङ्घचालकस्य दिवङ्गतस्य बाळासाहेबदेवरसस्य विषयकम् श्रद्धाञ्जलिसूचकं लेखद्वयम् ।

❄ अर्बुदरोगः किम् अपरिहार्यः ?

- मञ्जुनाथः

''अर्बुदरोगपीडितानां तु मरणं निश्चितमेव, यतः तस्य औषधमेव नास्ति इति प्रथा श्रूयते । किम् एतत् सत्यम् ।''

- स्वास्थ्यविषयकः लेखः ।

❄ संस्कृतभारत्याः प्रथमा अखिलभारतगोष्ठी

- वार्ताहरः

भोपालनगरे प्रवृत्तायाः संस्कृतभारत्याः प्रथम-अखिलभारतगोष्ठ्याः समग्रम् इतिवृत्तम् ।

❄ झम्पारवः **- डा. सुखेश्वर झा**

'भक्षकात् रक्षकः भलीयान्' - इति वचनं समर्थयन्ती मनोहारिणी आधुनिकी कथा ।

तदतिरिच्य -

बालमोदिनी, सम्पादकीयम्, निकषोपलः, पदरञ्जिनी, स्मारं स्मारं सुखिनः स्याम, वार्ताः - इत्यादयः स्थिरशिर्षिकाः ..... इत्यादीनि ।